श्रते। न्यूनातिरिक्तता न स्यात्तस्मिन् कर्म्मणि जैमिने!। तत्र तीर्थानि सर्व्वाणि त्रिस्रोतादीनि सन्ति वै!"। तत्पूजनफलं तत्रैव। "अश्वत्थपूजकोयस्तु सएव हरिपूजकः। अश्वत्थरूपी भगवान् स्वयमेव यतो हरिः"॥ तस्य तच्छाखायाश्च छेदने निषेधः तत्रैव। "तरुस्नानात् द्विजश्रेष्ठ! योऽश्वत्थं हन्ति मूढधीः। संसारे नास्ति तत् कर्म यत् कृत्वा स च शुध्यति। अश्वत्थोवृक्षराजोऽयं हरिमूर्त्तिः प्रकीर्त्तितः। तस्मादश्वत्थहन्तृणां त्राता कोऽपि न विद्यते। अश्वत्थशाखामेकां च स्वल्पामपि छिनत्ति यः। स कोटि ब्रह्महत्यानां फलं प्राप्नोति मानवः" इति च। अन्यान्यपि तच्छेदने पापानि तत्रैवोक्तानि दृश्यानि। तच्छाखाच्छेदनमयज्ञार्थमेव निषिद्धं यज्ञार्थच्छेदने तु न दोषः पशुहिंसावत्तस्यापि विहितत्वात् "अर्कः पलाशखदिरः अपामार्गोऽथ पिप्पल"इत्यादिना जीवहोमे तस्यैव समिधो विधानात्। २नन्दीवृक्षरूपे अश्वत्थभेदे च "नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः। स्थालीवृक्षःक्षयतरुः क्षीरी च स्याद्वनस्पतिः। नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवरउष्णकः। कटुपाकरसग्राहीविषपित्तकफास्रनुत्" भा०प्र०। ३गर्द्दभाण्डवृक्षे (वेलियापिप्पल) तद्गुणादि गर्द्दभाण्डशब्दे दृश्यम्। ४संसारवृक्षे तस्य चिरस्थायित्वाभावत् तथात्वम्। "ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्" गीता तद्विवरणमधःशाखशब्दे। अश्व इव तिष्ठति स्था-क पृ०। ५अश्विनीनक्षत्रे तस्याश्वशीर्षाकारस्याश्लेषाशब्दे उक्तत्वात्तथात्वम्। अश्वत्थनक्षत्रेण युक्तः कालः इत्यण् तस्य संज्ञायां लुप्। "अश्वत्थो मुहूर्त्तः" सि०कौ०। असंज्ञायान्तु आश्वत्थमहः आश्वत्थी रात्री। चतुरर्थ्यां काशा० इल। अश्वत्थिलः उत्क० छ अश्वत्थीयः तत्सन्निकृष्टदेशादौ त्रि०। अश्वत्थेन युक्ता पौर्णमासी अण्। तस्य पौर्णमास्यामपि "अग्रहायण्यश्वत्थाट्ठक्" पा० निर्द्देशात् नि० लुप् अश्वत्थयुक्तायां पौर्णमास्याम्। लुपि व्यक्तिवचनोक्तेः पुंस्त्वम्। तत्र भवः ठक्। आश्वत्थिकः। चान्द्राश्विनमासे।

**अश्वत्थक** पु० अश्वत्थस्तत्फलम् तद्युक्तः कालोऽप्यश्वत्थस्तत्र देयमृणम् वुन्। अश्वत्थफलकाले वैशाखादौ १देये ऋणे। स्वार्थे, कन्। २अश्वत्थवृक्षे।

**अश्वत्थकुण** पु० अश्वत्थस्य पाकः पील्वा० कुणच्। अश्वत्थपाके फलादौ। [अश्वत्थशब्दे विवृतिः।

**अश्वत्थभेद** पु० अश्वत्थस्य भेदोविशेषो यत्र। नन्दीवृक्षे

**अश्वत्थामन्** पु० अश्वस्येव स्थाम बलमस्य अश्वइव तिष्ठति युद्धे स्थिरत्वात् स्था-क वा पृषो०। भारतप्रसिद्धे १द्रोणाचार्य्यकृपीसुते वीरे। "गोतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः। अश्वत्थाम्नस्तु जननी कृपश्चैव महाबलः। अश्वत्थामा ततो जज्ञे द्रोणादेव महाबलः" भा०आ०प०। तस्य नामनिरुक्तिरपि दर्शिता भा०आ० १३०अध्या०। यथा "शारद्वतीं ततोभार्य्यां कृपीं द्रोणोऽन्वविन्दत। अग्निहोत्रे च धर्मे च दमे च सततं रताम्। अलभद्गौतमी पुत्रमश्वत्थामानमेव च। स जातमात्रो व्यनदद्यथैवोच्चैःश्रवा हयः। तच्छ्रुत्वान्तर्हितं भूतमन्तरीक्षस्थमब्रवीत्। अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम्। अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति" "अश्वस्य स्थाम्नोऽकारः वार्त्ति० अकारः। अश्वत्थामः। भवार्थे तु तस्य लुप् अश्वत्थामा तद्भवे। २भारतप्रसिद्धे पाण्डवसैन्यस्थे मालवेशेन्द्रवर्म्मणः २गजभेदे तत्कथा च "मतिमान् श्रेयसे युक्तः केशवोऽर्ज्जुनमब्रवीत्। नैष युद्धेन संग्रामे जेतुं शक्यः कथञ्चन। सधनुर्धन्विनां श्रेष्ठो देवैरपि सवासवैः। न्यस्तशस्त्रस्तु संग्रामे शक्यो हन्तुं भवेन्नृभिः। आस्थीयतां जये योगो धर्मसुतस्त्यज्य पाण्डवाः!। यथा नः संयुगे सर्व्वान्न हन्याद्रुक्मवाहनः। अश्वत्थाम्नि हते नैष युध्येदिति मतिर्मम। तं हतं संयुगे कश्चिदस्मै शंसतु मानवः। एतन्नारोचयद्राजन्! कुन्तीपुत्रो धनञ्जयः। अन्ये त्वरोचयन् सर्वे कृच्छ्रेण तु युधिष्ठिरः। ततो भीमो महाबाहुरनीके स्वे महागजम्। जघान गदया राजन्नश्वत्थामानमित्युत। परप्रमथनं घोरं मालवस्येन्द्रवर्म्मणः। भीमसेनस्तु सव्रीड उपेत्य द्रोणमाहवे। अश्वत्थामा हत इति शब्दमुच्चैश्चकार सः। अश्वत्थामेति हि गजः ख्यातो नामाहतोऽभवत्। कृत्वा मनसि तं भीमो मिथ्या व्याहृतवांस्तदा। भीमसेनवचः श्रुत्वा द्रोणस्तत्परमप्रियम्। मनसा सन्नगात्रोऽभूत् यथा सैकतमम्भसि। शङ्कमानः स तन्मिथ्या वीर्य्यज्ञः स्वसुतस्य वै। हतः स इति च श्रुत्वा नैव धैर्य्यादकम्पत"। "सन्दह्यमानो व्यथितः कुन्तीपुत्रं युधिष्ठिरम्। अहतं वा हतं वेति पप्रच्छ सुतमात्मनः। स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यते ऽनृतम्। त्रयाणामपि लोकानामैश्वर्य्यार्थे कथञ्चन। तस्मात्तं परिपप्रच्छ नान्यं कञ्चिद्द्विजर्षभः। तस्मिंस्तस्य हि सत्याशा बाल्यात्प्रभृति पाण्डवे। ततो निष्पाण्डवामुर्व्वीं करिष्यन्तं युधाम्पतिम्। द्रोणं ज्ञात्वा धर्मराजं गोविन्दो